टॉपिक 64 हलन्त पुँल्लिंग प्रकरण इकारान्त

शब्द रूप - 2

वा द्रुह-मुह-ष्णुह-ष्णिहाम् ।

एषां हस्य वा घो झलि पदान्ते च । ध्रुक्, ध्रुग्, ध्रुट्, ध्रुड् । द्रुहौ, । द्रुहः । ध्रुग्भ्याम्, ध्रुड्भ्याम् । ध्रुक्षु, ध्रुट्त्सु, ध्रुट्सु । एवं मुक्, मुग् इत्यादि ।

धात्वादेः षः सः ।

स्नुक्, स्नुग्, स्नुट्, स्नुड्, एवं स्निक् इत्यादि विश्ववाट्, विश्ववाड् । विश्ववाहौ, विश्ववाहः । विश्ववाहम् । विश्ववाहौ ।

इग्यणः संप्रसारणम् ।

यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् ।

वाह ऊठ् ।

भस्य वाहः संप्रसारणम् ऊठ् ।

सम्प्रसारणाच्च ।

संप्रसारणादचि पूर्वरूपमेकादेशः । वृद्धिः - विश्वौहः इत्यादि ।

चतुरनडुहोरामुदात्तः ।

अनयोराम् स्यात् सर्वनामस्थाने परे ।

सावनडुहः ।

अस्यनुम् स्यात् सौ परे। अनड्वान् ।

अम् सम्बुद्धौ

~~चतु~~ चतुरनडुहोरम् स्यात् सम्बुद्धौ। हे अनड्वन्!

हे अनड्वाहौ। हे अनड्वाहः। अनडुहः।

अनडुहा।

वसुस्रंसुध्वंस्वनडुहां दः ।

सान्तवस्वन्तस्य संस्रादेश्च दः स्यात् पदान्ते।

अनडुद्भ्याम् इत्यादि। सान्तेति किम् - विद्वान्।

पदान्तेति। किम् - स्रस्तम्, ध्वस्तम् ।

सहेः साडः सः।

साडरूपस्य सहेः सस्य मूर्धन्यादेशः स्यात्।

तुराषाट्, तुराषाड्। तुराषाहौ। तुराषाहः।

तुराषाड्भ्याम् इत्यादि।